वृत्तभागस्था गताः । ऊर्द्ध्वाधररेखामत्स्यसम्पाततिर्य्यग्रे-
खाग्रद्वयोरन्तरसूत्रमर्द्धज्यापदान्तः कोटिज्या भुजोत्क्र-
मज्योनव्यासार्द्धरेखारूपकोटितुल्यत्वात् । तदर्द्धचापं भु-
जांशोनं त्रिभमिति गम्यात् कोटिज्या । समपदे ग्रहोर्द्ध्वा-
धररेखान्तर तिर्य्यगर्द्धज्या भुजज्येति तदर्द्धं चापं यद्येवं
तिर्य्यग्रेखाग्रहान्तरं तिर्य्यगर्द्धज्याकोटितुल्यत्वात् कोटि-
ज्याचापं पदगतमित्युपपन्नं मतादित्यादि" रङ्गनाथः

**कोटितीर्थ** न० कोटिः तीर्थान्यत्र । १अवन्तिदेशस्थमहाकालस-न्निधिस्थे तीर्थभेदे । "महाकालं ततो गच्छेत् नियतो नियताशनः । कोटितीर्थमुपस्पृश्य हयमेधफलं लभेत्" भा०व० ८२अ० । २पञ्चनदान्तर्गते तीर्थभेदे च । "ततः पञ्चनदं गत्वा नियतो नियताशनः । कोटितीर्थमुप-स्पृश्य हयमेधफलं लभेत्" भा०८३अ०

**कोटिपात** न० कोटिरग्रं पात्यते जलाशयेऽस्य । केनिपातके हेमच० तदग्रस्य जले पातनेन नौचालनात्तस्य तथा-त्वम् । शब्दकल्पद्रुमे पुंस्त्वोक्तिः प्रामादिकी "केनिपातः कोटिपात्रमरित्रोडुपः प्लव" इति हेमचन्द्रे क्लीवत्व-निर्द्देशात् ।

**कोटिफल** न० ६त० । त्रिकोणादिक्षेत्रावयवस्य कोटेः फले । सि०शि०तदानयनप्रकारो दर्शितो यथा । "खेनाहते परिधिना भुजकोटिजीवे भांशै ३६० र्हृते च भुजकोटिफलाह्वये-स्तः" मू० । "अत्रोपपत्तिः । यावत् केन्द्रप्रतिमण्डले ताव-देव नीचोच्चवृत्ते स्यात् । अतः प्रतिमण्डलदोःकोटिज्ये अनुपातेन नीचोच्चवृत्ते परिणाम्येते यदि भांशवृत्ते ३६०एते दोःकोटिज्ये तदा परिध्यंशवृत्ते किमिति । अथवा त्रि-ज्याव्यासार्द्धे एते दोःकोटिज्ये तदान्त्यफलज्याव्यासार्द्धे किमिति । फलं तुल्यमेव" प्रमि० ।

उक्तञ्च सू०सि० रङ्गनाथाभ्यां यथा

"तद्गुणे भुजकोटिज्ये भगणांशविभाजिते । तद्भुजज्याफल-धनुर्मान्दं लिप्तादिकं फलम्" मू० "भुजकोटिजेत्र मन्द-शीघ्रान्यतरसम्बन्धेन केन्द्रभुजकोटिज्ये तद्गुणे स्वीयस्फु-टपरिधिना गुणिते भगणांशैः षष्ट्यधिकशतत्रयेण भक्ते भुजफलकोटिफले भवतः । मन्दकेन्द्रभुजज्योत्पन्नफलस्य धनुःफलादिकं मान्दं फलं भवति । अत्रोपपत्तिः । कक्षास्थोच्चस्थानस्थितदेवतया स्वहस्तस्थितसूत्रपाशेन ग्रह-बिम्बं स्वाभिमुखाकर्षणेन कक्षास्थमध्यग्रहस्थानात् पर-मफलज्यान्तरितस्थाने आकर्षणसूत्रमार्गरूपतिर्य्यक्कर्ण-मार्गेणाकृष्यते । तेन मध्यग्रहस्थानीयकक्षाप्रदेशात्परमफ-लज्याव्यासार्द्धेनोत्पन्नवृत्ते भगणांशाङ्किते मध्यग्रहस्पृ-ग्रेखावक्रतद्वृत्तप्रदेशरूपोच्चस्थानात् केन्द्रान्तरेण कक्षावि-परीतमार्गे तद्वृत्तपरिधौ ग्रहो भवति । तस्मिन्नीचोच्च-वृत्ते ऊर्द्ध्वरेखाग्रहयोस्तिर्य्यगन्तरसूत्रमर्द्धज्याकारं पर-मफलज्यानुरूपं भुजफलम् । तस्मिन्नेव वृत्ते व्यासमित-तिर्य्यग्रेखाग्रहयोरन्तरमूर्द्ध्वाधरमर्द्धज्याकारं परमफल-ज्यानुरूपं कोटिफलम् । एते तत्र कक्षास्थभुजज्याको-टिज्यावद्भुजकोटिरूपे इति । कक्षास्थभगणांशप्रमाणेनैते भुजज्याकोटिज्यारूपे भुजकोटी तदा कक्षास्थभांशप्रमा-णानुरूपप्राग्युक्तनीचोच्चपरिधिभागैः केइत्यनुपातेन फल-वृत्तस्थत्वाद्भुजफलकोटिफले" रङ्गनाथः

**कोटिर** पु० कोटिं राति रा-क । १इन्द्रे, २नकुले, ३इन्द्रगो-पकीटे च मेदि०

**कोटि(टी)वर्षा** स्त्री० कोटिभिरग्रैर्वर्षति मधु वृष—अच् । (पिडिङ्ग) १शाकभेदे । अमरः दीर्घमध्यस्तदर्थे शब्दच० २वाणासुरपुरे न० शब्दर०

**कोटि(टी)श** पु० कोट्या अग्रेण शृणाति शॄ—क । १लोष्टभेद-नेऽस्त्रे (मइ)(मुगर)इति वा ख्याते पदार्थे रत्नको० १स्त्र-मध्यः वासुकिवंश्ये २नागभेदे पु० "कोटिशो मानसः पूर्णः शलः पालो हलीमकः" भा० आ० ५७अ० वासुकिवंश्योक्तौ

**कोटी** स्त्री० कुट—इन् ङीप् । (पिडिङ्ग)१शाकभेदे शब्दरत्ना० २कोटिशब्दार्थे च "प्रतोदैश्चापि कोटीभिर्हुङ्कारैः साधु-वाहितः" भा० द्रो० ८९अ०

**कोटीर** पु० कोटिमीरयति ईर-अण् ।१किरीटे, हेमच० २ज-टायां त्रिका० "कोटीरबन्धनधनुर्गुणयोगपट्टेति" नैष०

**कोट्ट** पु० कुट्ट—घञ् नि० गुणः । दुर्गे (गड़) अमरः २पुरभेदे (कोटकाङ्गड़ा) ३राजधानीभेदे च न० हेमच०

**कोट्टवी** स्त्री० कोट्टं वाति वा—क गौरा० ङीष् । १नग्नायां मुक्तकेश्यां स्त्रियाम् २दुर्गायाञ्च जटा० ३बाणासुरमातरि च तत्र दुर्गायास् हरिवं० १८५अ०

"कुमाररक्षणार्थाय बिभ्रती सुतनुं तदा । दिग्वासा देव-वचनात् प्रातिष्ठद्य कोट्टवी । लम्बा नाम महाभागा भागो देव्यास्तथाष्टमः । चित्रा कनकशक्तिस्तु सा च लम्बा स्थितान्तरे । अथान्तरा कुमारस्य देवी दृष्टा म-हाभुजः । पराङ्मुखस्ततो वाक्यमुवाच मधुसूदनः । भगवानुवाच अपगच्छापगच्छ त्वं धिक् तामिति च सोऽ-ब्रवीत् । किमेवं कुरुषे विघ्नं निश्चितस्य वधम्प्रति । वैश-म्पायन उवाच । श्रुत्वैव वचनं तस्य कोट्टवी तु तदा वि-